१०

246sk10

अजन्तपुंलिङ्गे अदन्तशब्दरूपाणि

प्रस्तावना -

वयं मनोभावानां प्रकटनाय वाक्यानां प्रयोगं कुर्मः। वाक्यं च पदानां समूहो भवति। संस्कृतभाषायां पदस्य द्वौ भेदौ स्तः - १.सुबन्तपदं, २.तिङन्तपदं च। येषां शब्दानाम् अन्ते सुपः भवन्ति ते शब्दाः सुबन्ताः कथ्यन्ते। येषां च अन्ते तिङः भवन्ति ते तिङन्ताः कथ्यन्ते इति पूर्वमपि सुप्तिङन्तं पदमिति सूत्रे आलोचितमेव। तत्र सुपः प्रातिपदिकाद् भवन्ति। प्रातिपदिकशब्दाः च द्विविधाः १.अजन्तशब्दाः २.हलन्तशब्दाः इति भेदात्। येषां शब्दानाम् अन्ते अच् भवति ते अजन्ताः शब्दाः। येषां शब्दानाम् अन्ते हल् भवति ते हलन्ताः। तत्र लिङ्गभेदेन अजन्तशब्दाः हलन्तशब्दाश्च त्रिविधाः भवन्ति। तथाहि अजन्तपुंलिङ्गशब्दाः, अजन्तस्त्रीलिङ्गशब्दाः, अजन्तनपुंसकलिङ्गशब्दाः, हलन्तपुंलिङ्गशब्दाः, हलन्तस्त्रीलिङ्गशब्दाः, हलन्तनपुंसकलिङ्गशब्दाश्चेति। अस्मिन् पाठे अजन्तपुंलिङ्गशब्दानां रूपसाधनप्रक्रियाम् आलोचयामः।

सुप्-प्रत्ययाः प्रातिपदिकाद् भवन्ति। अतः प्रातिपदिकं किम् इति जिज्ञासा भवति। अतः भगवान् पाणिनिः प्रातिपदिकसंज्ञाविधायकं सूत्रद्वयं रचितवान्। प्रातिपदिकं व्युत्पन्नम् अव्युत्पन्नं च भवति। तत्र येषां शब्दानां व्याकरणप्रक्रियया प्रकृतिप्रत्ययादिविभागः कर्तुं शक्यते ते शब्दाः व्युत्पन्नाः। यथा पाचक इत्यादिशब्दाः। येषां शब्दानां व्याकरणप्रक्रियया प्रकृतिप्रत्ययादिविभागं कर्तुं न शक्यते ते शब्दाः अव्युत्पन्नाः। यथा चैत्र मैत्र इत्यादिशब्दाः। केचन च शब्दाः व्युत्पन्नाः अव्युत्पन्नाः च भवन्ति। यथा राम इत्यादयः।

उद्देश्यानि

इमं पाठं पठित्वा भवान्-

- प्रातिपदिकस्य समीचीनं परिचयं प्राप्स्यति।
- सुबन्तशब्दानां स्वरूपं ज्ञास्यति।
- विभक्तेः परिचयं ज्ञात्वा पाणिनीयव्याकरणम् प्रवेष्टुम् पारयेत्।
- अकारान्तपुंलिङ्गशब्दानां रूपाणि ज्ञास्यति।
- रामशब्दस्य रूपसिद्धिं कर्तुं शक्ष्यति।
- सूत्रस्य व्याख्या कथं भवती इति ज्ञातुं शक्नुयात्।

- स्वयमपि सूत्रस्य व्याख्यां कर्तुं शक्नुयात्।
- लघुसूत्रस्य अर्थः कथं महान् भवति इति जानीयात्।

[१०.१] अर्थवदधातुरप्रत्ययः प्रातिपदिकम्॥ (१.२.४५)

सूत्रार्थः - धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं भवति।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अनेन सूत्रेण प्रातिपदिकसंज्ञा विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। अर्थवत् अधातुः अप्रत्ययः प्रातिपदिकम् इति पदच्छेदः। प्रातिपदिकम् इति प्रथमैकवचनान्तं पदम्। अर्थवद् इति प्रथमैकवचनान्तं पदम्। अधातुः इति प्रथमैकवचनान्तं पदम्। अप्रत्ययः इत्यपि प्रथमैकवचनान्तं पदम्। शब्दस्वरूपम् इति विशेष्यपदस्य अध्याहारः भवति। अर्थोऽस्य अस्तीति अर्थवत्। न धातुः अधातुः इति नञ्तत्पुरुषसमासः। अस्य च धातुभिन्नम् इत्यर्थः। न प्रत्ययः इति अप्रत्ययः इति नञ्तत्पुरुषसमासः। अस्य च पदस्य आवृत्तिः क्रियते। तेन अप्रत्ययः अप्रत्ययः इति भवति। तत्र प्रथमस्य प्रत्ययभिन्नमित्यर्थः। द्वितीयस्य च प्रत्ययान्तभिन्नमित्यर्थः। एवम् सूत्रार्थो भवति - धातुभिन्नं प्रत्ययभिन्नं प्रत्ययान्तभिन्नं च यद् अर्थवत् शब्दस्वरूपं तत् प्रातिपदिकसंज्ञं भवति। अव्युत्पन्नशब्दानां प्रातिपदिकसंज्ञाविधायकं सूत्रमिदम्।

उदाहरणम् - अनेन सूत्रेण अव्युत्पन्नपक्षे दशरथपुत्रवाचकस्य रामशब्दस्य प्रातिपदकसंज्ञा भवति। रामशब्दः न धातुः नापि प्रत्ययः नापि प्रत्ययान्तः। परन्तु रामशब्दस्य अर्थः अस्ति। तस्मात् अर्थवत्त्वात् प्रत्ययभिन्नत्वात् प्रत्ययान्तभिन्नत्वात् धातुभिन्नत्वाच्च अनेन सूत्रेण प्रातिपदिकसंज्ञा भवति। तदा प्रातिपदिकसंज्ञकात् रामशब्दात् प्रथमादिविवक्षायां स्वादयः प्रत्ययाः भविष्यन्ति।

यदा च राम इत्यत्र रमुधातोः घञ्प्रत्यये कृते सति राम शब्दः सिध्यति। तदा अयं व्युत्पन्नः शब्दः। अस्मिन् पक्षे राम इति शब्दस्य घञ्-प्रत्ययान्तत्वात् पूर्वसूत्रेण प्रातिपदिकसंज्ञा भवितुं नार्हति। तदा द्वितीयं सूत्रं कृतं पाणिनिना।

[१०.२] कृत्तद्धितसमासाश्च॥ (१.२.४६)

सूत्रार्थः - कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अनेन सूत्रेण प्रातिपदिकसंज्ञा विधीयते। अस्मिन् सूत्रे द्वे पदे स्तः। कृत्तद्धितसमासाः च इति सूत्रगतपदच्छेदः। चेति अव्ययपदम्। अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इत्यस्मात् सूत्रात् प्रातिपदिकम् इति प्रथमान्तं पदम् अनुवर्तते। तस्य प्रातिपदिकानि इति बहुवचनान्ततया विपरिणामः भवति। शब्दस्वरूपाणि इति बहुवचनान्तस्य अध्याहारः भवति। कृत्तद्धितसमासाः इति प्रथमाबहुवचनान्तं समस्तं पदम्। कृत् च तद्धितश्च समासश्च इति कृत्तद्धितसमासाः इति इतरेतरद्वन्द्वसमासः। कृत्तद्धितसमासाः शब्दस्वरूपाणि प्रातिपदिकसंज्ञकानि इति पदयोजना। सूत्रे कृत्तद्धितौ प्रत्ययौः भवतः। तस्मात् प्रत्ययग्रहणपरिभाषया तदन्तविधिः भवति। तेन कृदन्तः तद्धितान्तः इत्यर्थः लभ्यते। अतः कृदन्तं तद्धितान्तं समासः च यत् शब्दस्वरूपं तत् प्रातिपदिकसंज्ञकं भवति इत्यर्थलाभः। अर्थात् कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः इति।

उदाहरणम् - व्युत्पन्नपक्षे कृदन्तस्य उदारहणं तावत् राम इति। रमुधातोः घञ्प्रत्यये रामशब्दः निष्पद्यते। घञ्प्रत्ययः तिङ्भिन्नः कृदतिङ् इत्यनेन कृत्संज्ञकः। तस्मात् कृदन्तत्वात् रामशब्दस्य अनेन सूत्रेण प्रातिपदिकसंज्ञा भवति।

तद्धितान्तस्य उदारहणं तावत् दाशरथिः इति। दशरथशब्दात् इञ्-प्रत्ययः विहितः अस्ति। स च तद्धितसंज्ञकः अस्ति। तस्मात् दाशरथि इति शब्दः तद्धितान्तः। अतः दाशरथिशब्दस्य अनेन सूत्रेण प्रातिपदिकसंज्ञा भवति।

समासस्य उदारहणं तावत् राजपुरुष इति। राज्ञः पुरुषः इति विग्रहे समासे सति राजपुरुष इति निष्पद्यते। राजपुरुष इति समुदायः समासः। अतः राजपुरुषशब्दस्य अनेन सूत्रेण प्रातिपदिकसंज्ञा।

[१०.३] प्रत्ययः॥ (३.१.१)

सूत्रार्थः - आ पञ्चमाध्यायपरिसमाप्तेरधिकारोऽयम्।

सूत्रव्याख्या - इदम् अधिकारसूत्रम्। अस्मिन् एकं पदम् अस्ति। प्रत्ययः इति प्रथमान्तपदम्। तृतीयाध्यायस्य इदम् आदिमं सूत्रम्। पञ्चमाध्यायस्य समाप्तिं यावत् अस्य सूत्रस्य अधिकारः अस्ति। तेन अस्मात् सूत्रात् आरभ्य पञ्चमाध्यायस्य अन्तं यावत् ये विहिताः तेषां प्रत्ययसंज्ञा भवति इति अस्य सूत्रस्य अधिकारलभ्यः अर्थः। अर्थात् अस्य सूत्रस्य अधिकारे पठितेषु सूत्रेषु प्रत्ययः इति पदम् अधिक्रियते।

[१०.४] परश्च॥ (३.१.२)

सूत्रार्थः - आ पञ्चमाध्यायपरिसमाप्तेरधिकारोऽयम्।

सूत्रव्याख्या - इदम् अधिकारसूत्रम्। अस्मिन् सूत्रे द्वे पदे स्तः। परः च इति छेदः। परः इति प्रथमैकवचनान्तं पदम्। चेति अव्ययपदम्। तृतीयाध्यायस्य इदं द्वितीयं सूत्रम्। आपञ्चमाध्यायपरिसमाप्तेः अस्य सूत्रस्य अधिकारः विद्यते। तेन अस्य सूत्रस्य अधिकारे पठितेषु सूत्रेषु परः इति पदम् अधिक्रियते। अतः अस्मिन् अधिकारे पठितैः सूत्रैः यस्मात् प्रत्ययस्य विधानं भवति तस्मात् परमेव प्रत्ययाः भवन्ति इति सूत्रस्य तात्पर्यार्थः।

[१०.५] ङ्याप्प्रातिपदिकात्॥ (४.१.१)

सूत्रार्थः - आ पञ्चमाध्यायपरिसमाप्तेः इदम् अधिक्रियते। आ पञ्चमाध्यायपरिसमाप्तेः ये प्रत्ययाः विधीयन्ते ते ङ्यन्तात् आबन्तात् प्रातिपदिकात् परे एव स्युरिति सारः।

सूत्रव्याख्या - इदम् अधिकारसूत्रम्। अस्य सूत्रस्य पञ्चमाध्यायपरिसमाप्तिं यावत् अधिकारः विद्यते। अस्मिन् सूत्रे ङ्याप्प्रातिपदिकात् इति पञ्चम्यन्तम् एकं पदं वर्तते। ङी च आप् च प्रातिपदिकञ्च इति ङ्याप्प्रातिपदिकम् इति समाहारद्वन्द्वसमासः, तस्मात् ङ्याप्प्रातिपदिकात् इति। अनुबन्धरहितस्य ङी इत्यस्य ग्रहणात् ङी इत्यनेन ङीप्, ङीष्, ङीन् इति त्रयाणां स्त्रीप्रत्ययानां ग्रहणं भवति। अनुबन्धरहितस्य आप् इत्यस्य ग्रहणात् आप् इत्यनेन टाप्, डाप्, चाप् इत्येतेषां त्रयाणां स्त्रीप्रत्ययानां

ग्रहणं भवति। प्रत्ययग्रहणपरिभाषया तदन्तविधिना ङी इत्यनेन ङ्यन्तं किञ्च आप् इति अनेन आबन्तम् इत्यर्थः लभ्यते। अतः पञ्चमाध्यायपरिसमाप्तिं यावत् प्रतिसूत्रं ङ्यन्तात् आबन्तात् प्रातिपदिकात् इति पदत्रयम् अधिक्रियते इत्यर्थः।

पाठगतप्रश्नाः-१

१. प्रातिपदिकसंज्ञाविधायकं सूत्रं किम् अस्ति।

२. कृतादिप्रत्ययान्तानां प्रातिपदिकसंज्ञाविधायकं सूत्रं किम्।

३. प्रत्ययः इति कीदृशं सूत्रम्।

४. प्रत्ययः इत्यस्य अधिकारः कियान् अस्ति।

५. ङ्याब्प्रातिपदिकात् इति कीदृशं सूत्रम्।

६. राम इत्यत्र प्रातिपदिकसंज्ञाविधायकं सूत्रं किम्।

[१०.६] स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्॥ (४.१.२)

सूत्रार्थः - ङ्यन्तादाबन्तात् प्रातिपतिकात् च पराः स्वादयः प्रत्ययाः भवन्ति।

सूत्रव्याख्या - इदं विधिसूत्रम्। एकपदात्मके अस्मिन् सूत्रे स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् इति प्रथमैकवचनान्तं पदम्। ङ्याप्प्रातिपदिकात् प्रत्ययः परश्च इति सूत्राणि अधिक्रियन्ते। तेन ङ्याप्प्रातिपदिकात् प्रत्ययः परश्च स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् इति पदयोजना। सुश्च औश्च जः च अम् च औट् च शश्च टा च भ्याञ्च भिश्च ङेश्च भ्याञ्च भ्यश्च ङसिश्च भ्याञ्च भ्यश्च ङश्च ओश्च आञ्च ङिश्च ओश्च सुप् च इति स्वौजसमौट्-छष्टाभ्यम्भिस्-ङेभ्याम्भ्यस्-ङसिभ्याम्भ्यस्-ङसोसाम्-ङ्योस्सुप् समाहारद्वन्द्वसमासः। ङ्याप्प्रातिपदिकात् इत्यत्र ङ्यापौ प्रत्ययौ। अतः प्रत्ययग्रहणपरिभाषया तदन्तविधिना ङ्यन्तात् आबन्तात् इति लभ्यते। सूत्रार्थो भवति - ङ्यन्तात् आबन्तात् प्रातिपदिकात् च स्वौजसमौट्-छष्टाभ्यम्भिस्-ङेभ्याम्भ्यस्-ङसिभ्याम्भ्यस्-ङसोसाम्-ङ्योस्सुप् प्रत्ययः परः भवति। अर्थात् यत् शब्दस्वरूपं ङीप्रत्ययान्तम् अस्ति, आप्-प्रत्ययान्तम् अस्ति, प्रातिपदिकमस्ति। तस्मात् प्रातिपदिकात् सु औ जस् अम् औट् शस् टा भ्याम् भिस् ङे भ्याम् भ्यस् ङसि भ्याम् भ्यस् ङस् ओस् आम् ङि ओस् सुप् इति एते पराः भवन्ति। तेषां प्रत्ययसंज्ञा च भवति। सुः आदिः येषां ते स्वादयः। एते एकविंशतिः प्रत्ययाः स्वादयः इति उच्यन्ते।

सु औ जस् इति प्रथमा। अम् औट् शस् इति द्वितीया। टा भ्याम् भिस् इति तृतीया। ङे भ्याम् भ्यस् इति चतुर्थी। ङसि भ्याम् भ्यस् इति पञ्चमी। ङस् ओस् आम् इति षष्ठी। ङि ओस् सुप् इति सप्तमी। अत्र प्रथमा इत्यादिसंज्ञाः पाणिनिना स्वयं विहिताः। तथापि पूर्वाचार्याणां व्यवहारात् तथा स्वीक्रियन्ते।

उदाहरणम् - अव्युत्पन्नपक्षे रामशब्दः अर्थवान्। अतः अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रेण प्रातिपदकसंज्ञा भवति। व्युत्पन्नपक्षे तु रामशब्दः घञन्तः। अतः कृदन्तः। अतः कृत्तद्धितसमासाश्च इत्यनेन प्रातिपदिकसंज्ञकः भवति। अतः प्रत्ययः परश्च ङ्याप्प्रातिपदिकात् इति सूत्रत्रयमधिकृत्य स्वौजसमौट्-छष्टाभ्याम्भिस्-ङेभ्याम्भ्यस्-ङसिभ्याम्भ्यस्-ङसोसाम्-ङ्योस्सुप् इति एकविंशतिः प्रत्ययाः प्राप्ताः।

अत्र रामशब्दात् परम् एकविंशतिः प्रत्ययाः प्रकृतसूत्रेण विधीयन्ते। ते च रामशब्दात् अव्यवहितपरम् एव निवेशनीयाः। रामशब्दात् परम् एकदा एक एव प्रत्ययः निवेशयितुं शक्यः। एककालम् एकविंशतिः प्रत्ययाः किञ्च अव्यवहितपराः इति नैव सम्भवति। अतः युगपत् एकविंशतिः प्रत्ययाः प्रयोक्तुं न शक्यन्ते, परन्तु एकैकः पर्यायेण प्रयोक्तुं शक्यते। तदा कः प्रत्ययः कस्मै प्रयोजनाय प्रयोक्तव्यः इति विवेकाय अग्रिमाणि सूत्राणि आयान्ति।

[१०.७] सुपः॥ (१.४.१०२)

सूत्रार्थः - सुपस्त्रीणि त्रीणि वचनानि एकशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः।

सूत्रव्याख्या - इदं संज्ञासूत्रम्। अस्मिन् सूत्रे एकं पदं विद्यते। सुपः इति षष्ठ्येकवचनान्तं पदम्। अस्मिन् सूत्रे तान्येकवचनद्विवचनबहुवचनान्येकशः इत्यस्मात् सूत्रात् एकवचनद्विवचनबहुवचनानि (१/३), एकशः (अव्ययम्) इति द्वे पदे अनुवर्तेते। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः इत्यस्मात् सूत्रात् त्रीणि (१/३) त्रीणि (१/३) इति पदे अनुवर्तेते। एकवचनं, द्विवचनं, बहुवचनञ्चेति एकवचनद्विवचनबहुवचनानि इति इतरेतरयोगद्वन्द्वसमासः। सुपः त्रीणि त्रीणि एकशः एकवचनद्विवचनबहुवचनसंज्ञानि इति पदयोजना। एकशः इत्यस्य प्रत्येकमित्यर्थः। सुपः इत्यत्र सुप् इति प्रत्याहारः स्वौजसमौट् इत्यादिसूत्रे सु इत्यतः आरभ्य सुपः पकारपर्यन्तम्। सूत्रार्थो भवति - एकविंशतेः सुपां प्रत्यायानां प्रथमादिसप्तम्यन्तत्रिकाणां क्रमात् एकवचनद्विचनबहुवचनसंज्ञा भवति। अर्थात् सु औ जस् त्रयः। तेषु सु इति प्रथमस्य एकवचनम्, औ इति द्वितीयस्य द्विवचनम्, जस् इति तृतीयस्य बहुवचनम् इति संज्ञा भवति। एवम् अग्रेऽपि।

अधुना प्रातिपदिकसंज्ञकात् रामशब्दात् स्वादित्रिके प्राप्ते-

[१०.८] द्व्येकयोर्द्विचनैकवचने॥ (१.४.२२)

सूत्रार्थः - द्वित्वैकत्वयोः एते द्विवचनैकवचने स्तः।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण एकवचनद्विचवने विधीयेते। द्विपदात्मकेस्मिन् सूत्रे द्व्येकयोः द्विवचनैकवचने इति छेदः। द्व्येकयोः इति सप्तमीद्विवचनान्तं पदम्। द्वौ च एकश्च इति द्व्येकौ तयोः द्व्येकयोः इति इतरेतरयोगद्वन्द्वसमासः। द्वित्वे एकत्वे इति तदर्थः। द्विवचनैकवचने इति प्रथमाद्विवचनान्तं पदम्। द्विवचनं च एकवचनं च द्विवचनैकवचने इतीतरेतरयोगद्वन्द्वसमासः। तेन द्वित्वे

एकत्वे द्विवचनम् एकवचनम् इति संग्रहः। अनेन अस्य सूत्रस्य अर्थः भवति द्वित्वे विवक्षिते द्विवचनम् एकत्वविवक्षिते एकवचनम् च स्तः इति। अर्थात् यदा द्वित्वसंख्यायाः विवक्षा भवति तदा द्विवचनं भवति। यदा च एकत्वसंख्यायाः विवक्षा भवति तदा एकवचनं भवति।

उदाहरणम्- एकत्वे एकवचनस्य उदारहणं तावत् रामः इति। प्रातिपदिकसंज्ञकात् रामशब्दात् प्रथमैकवचनविवक्षायां प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात् इत्यधिकारे पठितेन स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् इत्यनेन सुप्रत्यये सुप्रत्ययावयवस्य उकारस्य पाणिनीयैः प्रतिज्ञातस्य उपदेशे विद्यमानस्य अनुनासिकस्य उपदेशेजनुनासिक इत् सूत्रेण इत्संज्ञायां तस्य लोपः इत्यनेन लोपे रामस् इत्यस्य सुबन्तत्वात् सुप्तिङन्तं पदम् इत्यनेन पदसंज्ञायां ससजुषो रुः इत्यनेन पदान्तस्य सस्य रुत्वे रोरुकारस्य पाणिनीयैः प्रतिज्ञातस्य उपदेशे विद्यमानस्य अनुनासिकस्य उपदेशेजनुनासिक इत् इति सूत्रेण इत्संज्ञायां तस्य लोपः इत्यनेन अदर्शनाभिन्ने लोपे रामर् इति जाते रेफोच्चारणात् परं वर्णोच्चारणाभावेन तदभावस्य विरामोऽवसानम् इति सूत्रेण अवसानसंज्ञा भवति। तदा तस्मिन् अवसाने परे खरवसानयोर्विसर्जनीयः इत्यनेन रेफस्य विसर्गे रामः इति रूपम्।

प्रातिपदिकसंज्ञकात् रामशब्दात् प्रथमाद्विवचनविवक्षा भवति। परन्तु सकृदुच्चारितशब्दः सकृदेवार्थं गमयति इति नियमः अस्ति। अपि च प्रत्येकं शब्दाभिनिवेशः इति भाष्ये उक्तम्। अर्थात् एकः उच्चारितः शब्दः एकमेव अर्थम् अवगमयति। प्रत्येकस्य अर्थस्य कृते पृथक् पृथक् शब्दः देयः। तस्मात् रामशब्दात् प्रथमाद्विवचनविवक्षायां रामशब्दः वारद्वयम् उच्चारणीयः। अतः रामशब्दे द्विः प्रयुक्ते स्वौजसमौट्-छष्टाभ्याम्भिस्-ङेभ्याम्भ्यस्-ङसिभ्याम्भ्यस्-ङसोसाम्-ङ्योस्सुप् इति सूत्रेण औप्रत्यये राम राम औ इति स्थिते-

[१०.९] सरूपाणामेकशेष एकविभक्तौ (१.२.६४)

सूत्रार्थः - एकविभक्तौ यानि स्वरूपाण्येव दृष्टानि तेषामेक एव शिष्यते।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे त्रीणि पदानि विद्यन्ते। सरूपाणाम् एकशेषः एकविभक्तौ इति सूत्रगतपदच्छेदः। सरूपाणाम् इति षष्ठ्येकवचनान्तं पदम्। समानं रूपं येषां ते स्वरूपाः, तेषां सरूपाणाम् इति बहुव्रीहिसमासः। एकशेषः इति प्रथमायाः एकवचनम्। एकश्चासौ शेषश्च इति एकशेषः इति कर्मधारयसमासः। एकविभक्तौ इति सप्तम्येकवचनान्तं पदम्। एका चासौ विभक्तिश्च एकविभक्तिः तस्याम् इति एकविभक्तौ इति कर्मधारयसमासः, समानविभक्तौ इत्यर्थः। 'वृद्धो यूना तल्लक्षणश्चेदेव विशेषः' इत्यस्मात् सूत्रात् एव इति अव्ययपदम् अनुवर्तते। एकविभक्तौ सरूपाणाम् एकः एव शेषः इति पदयोजना। तेन एकस्मिन् विभक्तौ समानरूपाणां शब्दानाम् एकः एव अवशिष्यते अन्ये लुप्यन्ते इत्यर्थो लभ्यते।

उदारहणम्- रामौ।

सूत्रार्थसमन्वयः- प्रातिपदिकसंज्ञकात् रामशब्दात् प्रथमाद्विवचनविवक्षायां प्रत्ययः, परश्च, ङ्याप्प्रातिपदिकात् इत्यधिकारे पठितेन ङ्यन्तात् आबन्तात् प्रातिपदिकात् च स्वौजसमौट्-छष्टाभ्याम्भिस्-ङेभ्याम्भ्यस्-ङसिभ्याम्भ्यस्-ङसोसाम्-ङ्योस्सुप् इत्यनेन सूत्रेण एकविंशतिः प्रत्ययाः प्राप्नुवन्ति। ततः सुपः इत्यनेन सूत्रेण सप्तानाम् अपि त्रिकाणां क्रमात् एकचवन-द्विवचन-बहुवचनसंज्ञा भवति। ततः प्रथमायाः द्विवचनविवक्षायां द्व्येकयोर्द्विवचनैकवचने इत्यनेन द्विवचनसंज्ञके औप्रत्यये राम राम औ इति भवति। ततः सरूपाणामेकशेष एकविभक्तौ इत्यनेन सूत्रेण समानविभक्तौ सरूपाणाम् एकशेषे राम औ इति स्थितिः जायते। अकारात् परम् एच् औकारः अस्ति। तेन आद् एचि परे वृद्धिरेचि इत्यनेन सूत्रेण अकारौकारयोः वृद्धिः प्राप्ता। तां प्रबाध्य प्रथमयोः पूर्वसवर्णः इत्यनेन सूत्रेण अकः प्रत्याहारात् प्रथमाद्वितीययोः अचि परे पूर्वपरयोः स्थाने पूर्ववर्णस्य अकारस्य सवर्णदीर्घे आकरः प्राप्तः। तस्य नादिचि इत्यनेन सूत्रेण अवर्णाद् इचि प्रत्याहारे परे पूर्ववर्णस्य अकारस्य दीर्घनिषेधः भवति। ततः पुनः वृद्धिरेचि इत्यनेन पूर्वपरयोः वृद्धौ एकादेशे औकारे रामौ सिद्ध्यति।

विशेषव्याख्या- समानविभक्तिषु यदि समानानि रूपाणि भवन्ति तदैव अस्य सूत्रस्य प्रवृत्तिः भवति, अन्यथा न भवति। यथा मातृशब्दौ द्वौ स्तः। एकश्च मातृशब्दः जननीवाचकः। यस्य रूपाणि भवन्ति माता, मातरौ, मातरः, मातरं, मातरौ मातृ इत्यादीनि। अपरश्च परिमाणवाचकः मातृशब्दः अस्ति। यस्य रूपाणि भवन्ति माता, मातारौ, मातारः, मातारं, मातारौ, मातृन् इत्यादीनि। एतयोः द्वयोरपि मातृशब्दयोः द्वन्द्वसमासे तु एकशेषः न भवति। कारणं हि जननीवाचकस्य मातृशब्दस्य औविभक्त्यां मातरौ इति भवति। किञ्च परिमाणवाचकस्य मातृशब्दस्य औविभक्त्यां मातारौ इति भवति। एतयोः शब्दयोः समानविभक्तिषु औ-इत्यादिषु समानरूपाणि न भवन्ति। अतः एतयोः एकशेषः न भवति।

पाठगतप्रश्नाः-२

७. स्वौजस... इति सूत्रं व्याख्यात।

८. स्वादिप्रत्ययविधायकं सूत्रं किम्।

९. विभक्तिसंज्ञाविधायकं सूत्रं किम्।

१०. एकवचनसंज्ञाविधायकं सूत्रं किम्।

११. सरूपाणामेकशेष एकविभक्तौ इति सूत्रस्य अर्थं लिखत।

१२. सुपः इति सूत्रस्य अर्थं लिखत।

[१०.१०] बहुषु बहुवचनम्॥ (१.४.२१)

सूत्रार्थः - बहुत्वविवक्षायाम् बहुवचनं भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे द्वे पदे स्तः। बहुषु इति सप्तमीबहुवचनान्तं पदम्। अस्य च बहुत्वविवक्षायाम् इत्यर्थः। बहुवचनम् इति प्रथमैकवचनान्तं पदम्। अतः सूत्रार्थः भवति- बहुत्वसंख्यायाः विवक्षायां बहुवचनं भवति इति। बहु नाम द्वाभ्याम् अधिकम्।

उदाहरणम्- रामाः।

रामशब्दात् प्रथमाबहुवचनविवक्षायां बहुषु बहुवचनम् इति सूत्रसहायेन स्वौजसमौट्-छष्टाभ्यम्भिस्-ङेभ्याम्भ्यस्-ङसिभ्याम्भ्यस्-ङसोसाम्-ङ्योस्सुप् इत्यनेन सूत्रेण जस्प्रत्ययः भवति। तेन राम राम राम जस् इति तिष्ठति। ततः 'सरूपाणामेकशेषः एकविभक्तौ' इत्यनेन सूत्रेण एकविभक्तौ सरूपाणाम् एकशेषे राम जस् इति स्थिते अग्रिमं सूत्रं प्रवर्तते-

[१०.११] चुटू॥ (१.३.७)

सूत्रार्थः - प्रत्ययाद्यौ चुटू इतौ स्तः।

सूत्रव्याख्या- इदं संज्ञासूत्रम्। अस्मिन् सूत्रे एकं पदं विद्यते। चुटू इति प्रथमाद्विवचनान्तं पदम्। 'षः प्रत्ययस्य' इत्यस्मात् सूत्रात् प्रत्ययस्य इति षष्ठ्यन्तं पदम् अनुवर्तते। 'आदिर्ञिटुडवः' इत्यस्मात् सूत्रात् आदिः इति प्रथमान्तं पदम् अनुवर्तते। 'उपदेशेऽजनुनासिक इत्' इत्यस्मात् सूत्रात् इत् इति प्रथमान्तं पदम् अनुवर्तते। प्रत्ययस्य आदिः चुटू इत् इति पदयोजना। चुश्च टुश्च इति चुटू इति इतरेतरद्वन्द्वयोगसमासः। चुः इत्यनेन चवर्गीयः टुः इत्यनेन टवर्गीयः विवक्षितः। आदिः इति चुटू इत्यत्र द्विवचनान्ततया अन्वेति। इत् इत्यपि द्विवचनान्ततया चुटू इत्यनेन अन्वेति। अतः सूत्रस्यार्थः भवति- प्रत्ययस्य आदी चुटू इतौ भवतः इति। अर्थात् प्रत्ययस्य आदौ यदि चवर्गः टवर्गः वा भवति तर्हि तेषाम् इत्संज्ञा भवति इति।

उदाहरणम्- रामशब्दात् प्रथमाबहुवचनविवक्षायां जस्प्रत्यये राम जस् इति स्थितिः जायते। जस् इति प्रत्ययः अस्ति तस्य जकारः आदिः अस्ति। किञ्च चवर्गस्थः वर्णः अस्ति। तेन अनेन सूत्रेण तस्य इत्संज्ञा भवति। ततः 'तस्य लोपः' इत्यनेन लोपे राम अस् इति तिष्ठति। ततः अग्रिमं सूत्रं प्रवर्तते-

[१०.१२] विभक्तिश्च॥ (१.४.१०३)

सूत्रार्थः - सुप्तिङौ विभक्तिसंज्ञौ स्तः।

सूत्रव्याख्या- इदं संज्ञासूत्रम्। द्विपदात्मकमिदं सूत्रम्। विभक्तिः च इति सूत्रगदपदच्छेदः। विभक्तिः इति प्रथमैकवचनान्तं पदम्। चेति अव्ययपदम्। सुपः इति सम्पूर्णं षष्ठ्यन्तं सूत्रम् अनुवर्तते। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः इत्यस्मात् सूत्रात् तिङः इति षष्ठ्यन्तम् अनुवर्तते। सुपः तिङः विभक्तिसंज्ञा इति सूत्रार्थः जायते। एवञ्च सूत्रेण अनेन एकविंशतेः सुपां अष्टादशानां तिङां च विभक्तिसंज्ञा भवति इत्यर्थो लभ्यते।

विशेषविचारः- तत्र सु औ जस् इत्यादीनां त्रिकाणां प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञाः। पाणिनेः पूर्ववर्तिनः आचार्याः व्याकरणे व्यवहाराय एतेषां प्रथमादिसंज्ञां कृतवन्तः। तानि एव नामानि एत्र

व्यवह्रियन्ते। अर्थात् सु-औ-जस् इत्येतेषां प्रथमाविभक्तिः अम्-औट्-शस् इत्येतेषां द्वितीयाविभक्तिः, टा-भ्याम्-भिस् इत्येतेषां तृतीयाविभक्तिः, ङे-भ्याम्-भ्यस् इत्येतेषां चतुर्थीविभक्तिः, ङसि-भ्याम्-भ्यस् इत्येतेषां पञ्चमीविभक्तिः, ङस्-ओस्-आम् इत्येतेषां षष्ठीविभक्तिः, ङि-ओस्-सुप् इत्येतेषां सप्तमीविभक्तिः इत्यादीनि नामानि भवन्ति।

उदाहरणम्- रामशब्दात् प्रथमाबहुवचनविवक्षायां जस्प्रत्यये अनुबन्धलोपे राम अस् इति स्थितिः जायते। राम अस् इत्यत्र जस् इति सुप्प्रत्ययः अस्ति। अतः प्रकृतसूत्रेण तस्य विभक्तिसंज्ञा भवति। अधुना जस्प्रत्ययस्य अन्त्यस्य सकारस्य हलन्त्यम् इत्यनेन इत्संज्ञा प्राप्ता। ततः अग्रिमं सूत्रं प्रवर्तते-

[१०.१३] न विभक्तौ तुस्माः॥ (१.३.४)

सूत्रार्थः - विभक्तिस्थाः तवर्गसकारमकाराः इत्संज्ञकाः न भवन्ति।

सूत्रव्याख्या- इदं निषेधविधायकं सूत्रम्। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। नेति अव्ययपदम्। विभक्तौ इति सप्तम्येकवचनान्तं पदम्। तुस्माः इति प्रथमबहुवचनान्तं पदम्। उपदेशेऽजनुनासिक इत् इत्यस्मात् सूत्रात् इत् इति प्रथमान्तं पदम् अनुवर्तते। विभक्तौ तुस्माः न इत् इति पदयोजना। तुश्च स् च म् च इति तुस्माः इतरेतरयोगद्वन्द्वसमासः। तुः इत्यनेन तवर्गीयः विवक्षीतः। इत् इति पदं बहुवचनान्ततया तुस्माः इत्यनेन अन्वेति। विभक्तौ इत्यस्य च विभक्तिस्थाः इत्यर्थः। तेन अस्य सूत्रस्य अर्थः भवति- विभक्तिषु विद्यमानानां तवर्गस्थवर्णानां, सकारस्य मकारस्य च इत्संज्ञा न भवति इति। अनेन सूत्रेण विभक्तिसंज्ञकानां जस्, अम्, शस्, भ्याम्, भ्यस्, ङस्, ओस्, आम् इत्येतेषां सकारमकारयोः या इत्संज्ञा हलन्त्यम् इत्यनेन प्राप्ता तस्याः निषेधः भवति।

उदाहरणम्- रामाः।

सूत्रार्थसमन्वयः- राम अस् इत्यत्र 'हलन्त्यम्' इत्यनेन मकारस्य इत्संज्ञा प्राप्नोति। तस्याः अनेन सूत्रेण निषेधः भवति। तेन राम अस् इति तिष्ठति। ततः अग्रिमं सूत्रं प्रवर्तते-

[१०.१४] अतो गुणे॥ (६.१.९७)

सूत्रार्थः - अपदान्ताद् अकाराद् गुणे परे पररूपम् एकादेशः भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे पदद्वयं विद्यते। अतः गुणः इति सूत्रगतपदच्छेदः। अतः इति पञ्चम्येकचवनान्तं पदम्। गुणे इति सप्तम्येकवचनान्तं पदम्। 'एङि पररूपम्' इत्यस्मात् पररूपम् इति प्रथमान्तं पदम् अनुवर्तते। 'उस्यपदान्तात्' इत्यस्मात् सूत्रात् पदान्तात् इति पञ्चम्यन्तं पदम् अनुर्वतते। 'एकः पूर्वपरयोः' इति अधिक्रियते। अपदान्तात् अतः गुणे पूर्वपरयोः पररूपमेकादेशः इति सूत्रान्वयः। गुणशब्दः अत्र पारिभाषिकः। तेन अदेङ् गुणः इति सूत्रे अकारैकारौकाराणां च संज्ञा। तेन अस्य सूत्रस्य पदान्तभिन्नाद् अकारात् परे यदि गुणः तिष्ठति तर्हि पूर्वपरयोः पररूपम् एकादेशः भवति इति अर्थः समायाति।

उदाहरणम्- रामाः।

सूत्रार्थसमन्वयः- रामशब्दात् प्रथमाबहुवचनविवक्षायां जस्प्रत्यये अनुबन्धलोपे राम अस् इति स्थितिः जायते। अत्र रामशब्दस्य अन्ते अकारः अस्ति। तस्मात् रामशब्दः अदन्तः अस्ति। ततः परं गुणः अकारः अस्ति। अतः अदन्तात् रामशब्दात् गुणे परे अतो गुणे इत्यनेन पूर्वपरयोः पररूपैकादेशः प्राप्नोति। परन्तु अतो गुणे इत्यस्य अपवादत्वेन प्रथमयोः पूर्वसवर्णः इत्यनेन एकादेशं प्रबाध्य पूर्वसवर्णदीर्घे रामास् इति स्थितिः भवति। ततः समुदायस्य सुबन्तत्वेन पदसंज्ञा भवति। ततः ससजुषो रुः इत्यनेन सकारस्य रुत्वे रोः उकारस्य उपदेशेऽजनुनासिक इत् इत्यनेन इत्संज्ञा भवति। ततः तस्य लोपः इत्यनेन लोपे रामार् इति जाते रेफोच्चारणात् परं वर्णोच्चारणाभावेन तदभावस्य विरामोवसानम् इत्यनेन अवसानसंज्ञायां तस्मिन् परे खरवसानयोर्विसर्जनीयः इत्यनेन रेफस्य विसर्गे रामाः इति रूपम्।

[१०.१५] एकवचनं सम्बुद्धिः॥ (२.३.४९)

सूत्रार्थः - सम्बोधने प्रथमायाः एकवचनं सम्बुद्धिसंज्ञं भवति।

सूत्रव्याख्या- इदं संज्ञासूत्रम्। अस्मिन् सूत्रे द्वे पदे स्तः। एकवचनम् इति प्रथमैकवचनान्तं पदम्। सम्बुद्धिः इत्यपि प्रथमायाः एकवचनम्। सम्बोधने च इत्यस्मात् सूत्रात् सम्बोधने इति सप्तम्यन्तं पदम् अनुवर्तते। प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इत्यस्मात् सूत्रात् प्रथमा इति प्रथमान्तं पदम् अनुवर्तते। तच्च षष्ठ्यन्ततया विपरिणम्यते। सम्बोधने प्रथमायाः एकवचनम् सम्बुद्धिः इति पदयोजना। तेन सम्बोधने प्रथमयाः एकवचनस्य सम्बुद्धिसंज्ञा भवति इत्यर्थो लभ्यते।

उदारहणम्- रामशब्दस्य सम्बोधने प्रथमायाः एकवचनविवक्षायां सुब्विभक्तौ अनुबन्धलोपे हे राम स् इति जाते सुविभक्तेः अनेन सूत्रेण सम्बुद्धिसंज्ञा भवति। ततः सकारोत्तरस्य उकारस्य उपदेशेऽजनुनासिक इत् इत्यनेन इत्संज्ञायां, तस्य लोपः इत्यनेन तस्य लोपे हे राम स् इति भवति। अत्र सुप्रत्ययः रामशब्दात् विहितः, तस्मात् सुप्रत्यये परे तदादिशब्दस्वरूपस्य राम इत्यस्य यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् इति सूत्रेण अङ्गसंज्ञा भवति। अङ्गसंज्ञायाः उपयोगिता तु अग्रिमे सूत्रे प्रदर्श्यते।

पाठगतप्रश्नाः-३

१३. बहुवचनसंज्ञाविधायकं सूत्रं किम्।

१४. चुटू इति सूत्रस्य अर्थं लिखत।

१५. न विभक्तौ तुस्माः इति सूत्रार्थं लिखत।

१६. अतो गुणे इति सूत्रार्थं लिखत।

१७. सम्बुद्धिसंज्ञाविधायकं सूत्रं लिखत।

१८. अङ्गसंज्ञाविधायकसूत्रं किम्।

[१०.१६] एङ्ह्रस्वात्सम्बुद्धेः॥ (६.१.६७)

सूत्रार्थः - एङन्ताद् ह्रस्वान्तात् च अङ्गाद् हल् लुप्यते सम्बुद्धेश्चेद्।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे पदद्वयं विद्यते। एङ्ह्रस्वात् सम्बुद्धेः इति सूत्रगतपदच्छेदः। एङ्ह्रस्वात् इति पञ्चम्येकवचनान्तम्। सम्बुद्धेः इति षष्ठ्यैकवचनान्तम्। हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तं हल् इत्यस्मात् सूत्रात् हल् इति प्रथमान्तं पदम् अनुवर्तते। लोपो व्योर्वलि इत्यस्मात् सूत्रात् लोपः इति प्रथमान्तं पदम् अनुवर्तते। अङ्गस्य इति अधिक्रियते। तेन एङ्ह्रस्वात् अङ्गस्य सम्बुद्धेः हल् लोपः इति पदयोजना। एङ् च ह्रस्वश्च इति एङ्ह्रस्वम्, तस्मात् एङ्ह्रस्वात् इति इतरेतरयोगद्वन्द्वसमासः। अङ्गस्य इति पदं पञ्चम्यन्ततया विपरिणम्यते। एङ्ह्रस्वात् इति अङ्गस्य विशेषणम्। अतः 'येन विधिस्तदन्तस्य' इत्यनेन तदन्तविधिना एङन्तात् ह्रस्वान्तात् इत्यर्थलाभः। एवञ्च अस्य सूत्रस्य अर्थो भवति एङन्तात् ह्रस्वान्तात् च अङ्गाद् हल् लुप्यते संबुद्धेश्चेत् इति। अर्थात् एङन्तप्रातिपदिकात् ह्रस्वान्तप्रातिपदिकात् च परे यः सम्बुद्धिसंज्ञकः हल् विद्यते तस्य अनेन सूत्रेण लोपः भवति।

उदाहरणम्- हे राम।

सूत्रार्थसमन्वयः- रामशब्दात् सम्बोधनैकवचनस्य विवक्षायां सुप्रत्यये अनुबन्धलोपे राम स् इति स्थितिः। अत्र सुपः सकारः सम्बुद्धिसंज्ञकः हल् किञ्च ह्रस्वान्तात् अङ्गात् परम् अस्ति। तस्मात् अनेन सूत्रेण सकारस्य लोपे हे राम इति रूपम्। सम्बोधनस्य द्विवचनबहुवचने सम्बुद्धिसंज्ञके न स्तः। तस्मात् अनयोः सुप्प्रत्यययोः लोपः न भवति। तेन पूर्ववत् हे रामौ, हे रामाः इति भवतः।

[१०.१७] अमि पूर्वः॥ (६.१.१०३)

सूत्रार्थः.- अकः अमि अचि परे पूर्वरूपम् एकादेशः स्यात्।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे द्वे पदे स्तः। अमि इति सप्तम्याः एकवचनम्। पूर्वः इति प्रथमैकवचनान्तं पदम्। अकः सवर्णे दीर्घः इत्यस्मात् सूत्रात् अकः इति पञ्चम्यन्तं पदम् अनुवर्तते। इको यणचि इत्यस्मात् सूत्रात् अचि इति सप्तम्यन्तं पदम् अनुवर्तते। एकः पूर्वपरयोः इति सूत्रम् अधिक्रियते। अकः अमि अचि पूर्वपरयो पूर्वः इति पदयोजना। अत्र अकः अम् इति द्वौ प्रत्याहारौ। अम् इति विभक्तिः। तेन अस्य सूत्रस्य अर्थो भवति अक्प्रत्याहारात् परं यदि अम्प्रत्ययस्य अच् तिष्ठति तर्हि पूर्वपरयोः स्थाने पूर्वरूपम् एकादेशः भवति।

उदाहरणम्- रामम्।

सूत्रार्थसमन्वयः- रामशब्दात् द्वितीयैकवचनस्य विवक्षायां अमप्रत्यये अनुबन्धलोपे राम अम् इति जातम्। राम अम् इत्यत्र अम्प्रत्ययस्य विभक्तिश्च इत्यनेन विभक्तिसंज्ञा भवति। ततः मकारस्य हलन्त्यमिति सूत्रेण इत्संज्ञा प्राप्नोति। तस्याः न विभक्तौ तुस्माः इत्यनेन निषेधः भवति। ततः राम् अम् इति स्थितिः। रामशब्दस्य अन्तिमवर्णः अकारः। स च अक्प्रत्याहारे विद्यते। किञ्च अकारात् परं अमः अच् अकारः अस्ति। तस्मात् अनेन सूत्रेण पूर्वपरयोः स्थाने पूर्वरूपैकादेशे अकारे रामम् इति रूपं भवति।

रामशब्दस्य द्वितीयायाः द्विवचनविवक्षायाम् औट्प्रत्यये टकारस्य हलन्त्यम् इत्यनेन इत्संज्ञायां तस्य लोपः इत्यनेन तस्य लोपे, आद् एचि परे वृद्धिरेचि इत्यनेन सूत्रेण अकारौकारयोः वृद्धौ प्राप्तायां प्रथमयोः पूर्वसवर्णः इत्यनेन सूत्रेण सवर्णदीर्घे आकारे प्राप्ते नादिचि इत्यनेन सूत्रेण अस्य अकारस्य दीर्घनिषेधे पुनः वृद्धिरेचि इत्यनेन पूर्वपरयोः वृद्धौ एकादेशे औकारे रामौ सिद्ध्यति।

[१०.१८] लशक्वतद्धिते॥ (१.३.८)

सूत्रार्थः - तद्धितवर्जप्रत्ययाद्याः लशकवर्गा इतः भवन्ति।

सूत्रव्याख्या- इदं संज्ञासूत्रम्। अस्मिन् सूत्रे पदद्वयम् अस्ति। लशकु अतद्धिते इति सूत्रगतपदच्छेदः। लशकु इति प्रथमायाः एकवचनम्। अतद्धिते इति सप्तम्येकवचनान्तं पदम्। आदिर्ञिटुडवः इत्यस्मात् सूत्रात् आदिः इति प्रथमान्तं पदम् अनुवर्तते। षः प्रत्ययस्य इत्यस्मात् सूत्रात् प्रत्ययस्य इति षष्ठ्यन्तं पदम् अनुवर्तते। उपदेशेऽजनुनासिक इत् इत्यस्मात् सूत्रात् इत् इति प्रथमान्तं पदम् अनुवर्तते। तेन प्रत्ययस्य आदिः लशकु इत् इति पदयोजना। लश्च शश्च कुश्च इति लशकु समाहारद्वन्द्वसमासः। अतद्धिते इति सप्तम्याः एकवचनम्। न तद्धितः अतद्धितः, तस्मिन् अतद्धिते इति नञ्तत्पुरुषसमासः। तस्य च तद्धितभिन्नस्थाः इत्यर्थः। इत् इति पदं बहुवचनान्ततया विपरिणम्यते। तेन तद्धितभिन्नप्रत्ययाद्याः लशकर्गा इतः भवन्ति इति सूत्रार्थः समायाति।

उदाहरणम्- राम् शस् इत्यत्र शस्प्रत्ययः तद्धितसंज्ञकः न भवति। किञ्च प्रत्ययाद्यः शकारः अस्ति। तस्मात् लशक्वतद्धिते इत्यनेन सूत्रेण प्रत्ययादेः शकारस्य इत्संज्ञायायां तस्य लोपः इत्यनेन तस्य लोपे राम अस् इति स्थिते प्रथमयोः पूर्वसवर्णः इत्यनेन सूत्रेण पूर्वसर्वर्णदीर्घे आकारे रामास् इति भवति। ततः अग्रिमं सूत्रं प्रवर्तते-

[१०.१९] तस्माच्छसो नः पुंसि॥ (६.१.९९)

सूत्रार्थः - कृतपूर्वसवर्णदीर्घात् परो यः शसः सकारः तस्य नकारः भवति पुंलिङ्गे।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे चत्वारि पदानि विद्यन्ते। तस्मात् शसः नः पुंसि इति सूत्रगतपदच्छेदः। तस्मात् इति पञ्चम्याः एकवचनम्। शसः इति षष्ठ्याः एकवचनम्। नः इति प्रथमायाः एकवचनम्। पुंसि इति सप्तम्येकवचनम्। तस्य च पुंलिङ्गविषये इत्यर्थः। तस्मात् इत्यत्र तच्छब्दः पूर्वकार्यस्य बोधकः भवति। अतः अस्मात् सूत्रात् पूर्वं प्रथमयोः पूर्वसवर्णः इति सूत्रम् अस्ति। तेन सूत्रेण पूर्वपरयोः पूर्वसर्वर्णदीर्घरूपं कार्यं भवति। प्रकृतसूत्रे तच्छब्देन पूर्वसर्वर्णदीर्घरूपं कार्यमेव विवक्षितम्। शसः इति पदं षष्ठ्यन्तम् अल्समुदायबोधकम्। अर्थात् शसः इति पदस्य अर्थः केवलम् एक एव वर्णः इति न, अपि तु वर्णसमुदायः इति। अनुयोगिविरहात् तत्र या षष्ठी सा स्थानषष्ठी अस्ति। अपि च यः आदेशः सः नकारः अस्ति। अतः अलोन्त्यस्य इति परिभाषायाः सञ्चारेण सूत्रस्य अस्य अर्थो भवति- पूर्वसवर्णदीर्घात् परः यः शसः अन्त्यः अल् सकारः तस्य नकारः भवति पुंलिङ्गविषये इति।

उदाहरणम्- रामशब्दः पुंलिङ्गे अस्ति। रामशब्दस्य द्वितीयाबहुवचने राम अस् इत्यत्र अकारस्य पूर्वसवर्णदीर्घः जातः। तस्मात् अनेन सूत्रेण सकारस्य नकारादेशे रामान् इति जातम्। ततः अग्रिमं सूत्रं प्रवर्तते-

[१०.२०] अट्कुप्वाङ्नुम्व्यवायेऽपि॥ (८.४.२)

सूत्रार्थः - अट् कवर्गः पवर्गः आङ् नुम् च एतैः व्यस्तैः यथासम्भवं मिलितैश्च व्यवधाने अपि रषाभ्यां परस्य नस्य णः भवति समानपदे।

सूत्रव्याख्या- इदं विधिसूत्रम्। अस्मिन् सूत्रे द्वे पदे स्तः। अट्कुप्वाङ्नुम्व्यवाये अपि इति सूत्रगतपदच्छेदः। रषाभ्यां नो णः समानपदे इति सूत्रम् अनुवर्तते। अट्कुप्वाङ्नुम्व्यवाये इति सप्तम्येकवचनान्तं समस्तं पदम्। अट् च कुश्च पुश्च आङ् च नुम् च इति अट्कुप्वाङ्नुमः, इतरेतरयोगद्वन्द्वसमासः, तैः व्यवायः व्यवधानम् इति अट्कुप्वाङ्नुम्व्यवायः इति तृतीयातत्पुरुषसमासः, तस्मिन् अट्कुप्वाङ्नुम्व्यवाये इति सती सप्तमी। अपि इति अव्ययपदम्। रषाभ्यामिति पञ्चमीद्विवचनान्तं पदम्। नः इति षष्ठ्यन्तं पदम्। णः इति प्रथमैकवचनान्तं पदम्। समानपदे इति सप्तम्येकवचनान्तं पदम्। तस्य च एकपदे इत्यर्थः। रषाभ्यां णो नः समानपदे अट्कुप्वाङ्नुम्व्यवाये अपि इति पदयोजना। अट् इत्यनेन अट्प्रत्याहारस्य कु-इत्यनेन कवर्गस्य ग्रहणं भवति। पु-इत्यनेन पवर्गस्य ग्रहणं भवति। आङ्-इत्यनेन आङ् इति उपसर्गस्य ग्रहणं भवति। नुम् इत्यनेन अनुस्वारस्य च ग्रहणं भवति। एवञ्च अट्-कवर्ग-पवर्ग-आङ्-एतैः व्यवधाने सत्यपि रषाभ्यां नस्य णः भवति एकपदे इति सूत्रार्थः भवति। अट्-कवर्ग-पवर्ग-आङ्-एतैः एकैकशः व्यवधाने, सम्पूर्णैः मिलितैः व्यवधाने अपि रषाभ्यां परस्य नस्य णकारः भवति समानपदे।

उदाहरणम्- रामान् इत्यत्र रेफनकारयोः मध्ये आ-अट्प्रत्याहारस्य, म-पवर्गस्य, आ-अट्प्रत्याहारस्य च व्यवधानम् अस्ति। अतः अनेन सूत्रेण नकारस्य णकारादेशः प्राप्तः। तदा-

[१०.२१] पदान्तस्य॥ (८.४.३६)

सूत्रार्थः - रषाभ्यां परस्य पदान्तस्य नकारस्य णकारः न भवति।

सूत्रव्याख्या- विधिसूत्रम् इदम्। अस्मिन् सूत्रे एकं पदं विद्यते। रषाभ्यां नो णः समानपदे इत्यस्मात् सूत्रात् नः इति णः इति द्वे पदे अनुवर्तेते। न भाभूपूकमिगमिप्यायीवेपाम् इत्यस्मात् सूत्रात् न इति अव्ययपदम् अनुवर्तते। रषाभ्यामिति पञ्चमीद्विवचनान्तं पदम्। रषाभ्याम् इत्यत्र पञ्चमीनिर्देशात् तस्मादित्युत्तरस्य इति परिभाषया उत्तरस्य इति पदलाभः। तस्य च परस्य इत्यर्थः। नः इति षष्ठ्यन्तं पदम्। णः इति प्रथमैकवचनान्तं पदम्। समानपदे इति सप्तम्येकवचनान्तं पदम्। तस्य च एकपदे इत्यर्थः। रषाभ्यां परस्य पदान्तस्य नः णः न इति पदयोजना। पदान्तस्य इति नः इति च पदद्वयं षष्ठ्येकवचनान्तम्। अनेन सूत्रस्यास्य अर्थः भवति - पदान्तस्य नकारस्य णकारः न भवति इति।

उदाहरणम्- रामान्।

सूत्रार्थसमन्वयः- रामान् इत्यस्य अन्ते सुप्प्रत्ययः अस्ति। तेन सुप्तिङन्तं पदम् इत्यनेन तस्य पदसंज्ञा भवति। एतस्य च पदस्य अन्तिमवर्णः नकारः। अट्कुप्वाङ्नुम् इत्यादिसूत्रेण नकारस्य णत्वे प्राप्ते नकारस्य पदान्तत्वात् प्रकृतसूत्रेण णत्वादेशः न भवति। तेन रामान् इत्येव रूपम्।

पाठगतप्रश्नाः-४

१९. सम्बुद्धिसंज्ञकस्य अपृक्तस्य सकारस्य लोपः केन भवति।

२०. एङ्ह्रस्वात्सम्बुद्धेः इति सूत्रस्य अर्थं लिखत।

२१. राम + अम् इत्यत्र केन सूत्रेण पूर्वरूपम्।

२२. शसः शकारस्य इत्संज्ञा केन सूत्रेण भवति।

२३. शसः सकारस्य नकारादेशः कथम्।

२४. णत्वविधायकं सूत्रं किम् अस्ति।

पाठसारः

अस्मिन् पाठे आदौ प्रातिपदिकसंज्ञा कस्य भवति इति आलोचितम्। प्रातिपदिकसंज्ञाविधायकं सूत्रद्वयम् प्रतिपादितम्। आद्येन सूत्रेण धातुभिन्नस्य प्रत्ययभिन्नस्य प्रत्ययान्तभिन्नस्य च अर्थवतः शब्दस्वरूपस्य प्रातिपदिकसंज्ञा विधीयते। द्वितीयेन सूत्रेण कृदन्तस्य तद्धितान्तस्य समासानां च प्रातिपदिकसंज्ञा भवति। एकविंशतेः अपि सुब्विभक्तेः वर्णना विस्तारेण उपस्थापिता। ततः प्रादिपदिकात् कथं सुबुत्पत्तिः भवति इति तु अस्मिन् पाठे विस्तरेण वर्णितम्। रामशब्दस्य प्रथमायां द्वितीयायां रूपाणि कथं भवन्ति इति सविस्तरम् अस्मिन् पाठे वर्णितम्। रामशब्दस्य प्रातिपदिकसंज्ञायां सुबुत्पत्तौ प्रथमैकचवने सुप्रत्यये अनुबन्धलोपे राम् स् इत्यत्र सकारस्य रुत्वे विसर्गे रामः इति रूपं भवति। ततः अग्रे एवं रूपेण अन्यानि अपि रूपाणि कथं भवन्ति इति अस्मिन् पाठे वर्णितम्।

पाठान्तप्रश्नाः

१. अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इत्यस्य सूत्रं व्याख्यात।

२. कृत्तद्धितसमासाश्च इति सूत्रं व्याख्यात।

३. ङ्याब्प्रातिपदिकात् इति सूत्रं व्याख्यात।

४. स्वौजसमौट्छष्टाभ्यम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् इति सूत्रं व्याख्यात।

५. द्व्येकयोर्द्विवचनैकवचने इति सूत्रं व्याख्यात।

६. सरूपाणामेकशेष एकविभक्तौ इति सूत्रं व्याख्यात।

टिप्पणी

७. एङ्ह्रस्वात्सम्बुद्धेः इति सूत्रं व्याख्यात।

८. अट्कुप्वाङ्नुमव्यवायेऽपि इति सूत्रं व्याख्यात।

९. अमि पूर्वः इति सूत्रं व्याख्यात।

१०. प्रदत्तानि रूपाणि ससूत्रं साधयत – रामः रामौ रामाः रामम् रामान्

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।

२. कृत्तद्धितसमासाश्च।

३. अधिकारसूत्रम्।

४. आपञ्चमाध्यायपरिसमाप्तेः अधिकारः।

५. अधिकारसूत्रम्।

६. अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।

उत्तराणि-२

७. स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्।

८. स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्।

९. विभक्तिश्च।

१०. द्व्येकयोर्द्विवचनैकवचने।

११. एकविभक्तौ यानि स्वरूपाण्येव दृष्टानि तेषामक एव शिष्यते।

१२. सुपस्त्रीणि त्रीणि वचनानि एकशः एकवचनद्विवचनबहुवचनसंज्ञानि स्युः इति।

उत्तराणि-३

१३. बहुषु बहुवचनम्।

१४. प्रत्ययाद्यौ चुटू इतौ स्तः इति।

१५. विभक्तिस्थास्तवर्गसकारमकाराः न इतः स्युः।

१६. अपदान्ताद् अकाराद् गुणे परतः पररूपम् एकादेशः स्यात्।

१७. एकवचनं सम्बुद्धिः।

१८. यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्।

उत्तराणि-४

१९. एङ्ह्रस्वात्सम्बुद्धेः।

२०. एङन्तादह्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेद्।

२१. अमि पूर्वः।

२२. लशक्वतद्धिते

२३. तस्माच्छसो नः पुंसि इति सूत्रेण।

२४. अट्कुप्वाङ्नुम्व्यवायेऽपि

।।इति दशमः पाठः।।